# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा-नवम्बर/दिसम्बर-२०१६

| | | |
|---|---|---|
| **कक्षा - शास्त्रीप्रथम, सेमेस्टर-१** | **प्रश्नपत्रम् - ५** | **गुणाः - ७०** |
| **विषयः - पुराणेतिहासः** | **कोड - CC-1.1.1** | **समयः - ०३-०६** |
| **दिनाङ्कः - ९.१२.२०१६** | **ग्रन्थः - पद्मपुराणमाहात्म्यम् / श्रीमद्भागवतप्रथमस्कन्धः** | |

---

### प्रथमान्वितिः ( युनिट - १ )

**प्रश्नः १ अधोलिखितश्लोकेषु द्वयोः सन्दर्भप्रसङ्गानुसारं व्याख्यानं विधीयताम्** **०८**

(१) *जयति जगति मायां यस्य कायाधवस्ते*
*वचनरचनमेकं केवलं चाकलय्य।*
*ध्रुवपदमपि यातो यत्कृपातो ध्रुवोऽयं*
*सकलकुशलपात्रं ब्रह्मपुत्रं नतोऽस्मि ॥*

(२) *भाग्योदयेन बहुजन्मसमर्जितेन*
*सत्सङ्गमं च लभते पुरुषो यदा वै।*
*अज्ञानहेतुकृतमोहमदान्धकार-*
*नाशं विधाय हि तदोदयते विवेकः ॥*

(३) *कथा भागवतस्यापि नित्यं भवति यद्गृहे।*
*तद्गृहं तीर्थरूपं हि वसतां पापनाशनम् ॥*

**प्रश्नः २ कस्याप्येकस्य यथाग्रन्थं सविस्तरमुत्तरं दीयताम्।** **०८**

(१) *कलौ कीदृशाः सप्ताहयज्ञेन पुनन्ति तत्साधु लिख्यताम्।*
(२) *नारदकृतपृथ्वीलोकदर्शनं सम्यक् लिख्यताम्।*

**प्रश्नः ३ अधोलिखितासु टिप्पणीद्वयं लिख्यताम्।** **०४**

*(१) भागवतीकथा। (२) आत्मदेवव्यथा।*
*(३) गोकर्णगीता। (४) कथाश्रवणनियमाः।*

**प्रश्नः ४ अधोलिखितेषु पञ्चानामेकवाक्येन उत्तराणि यच्छन्तु।** **०५**

(१) *केन केन भागवतीकथा श्राव्या ?*
(२) *कथासमयः सत्यः कः ?*
(३) *धुन्धुकारी कीदृशः आसीत् ?*
(४) *धुन्धुली कीदृशी आसीत् ?*
(५) *आकाशवाणी श्रुत्वा नारदेन कुत्र किं कृतम् ?*
(६) *साधूनां दर्शनं कीदृशमस्ति ?*
(७) *के के मासाः मोक्षसूचकाः ?*

### द्वितीयान्वितिः ( युनिट - २ )

**प्रश्नः ५ अधोलिखितेषु कयोश्चित् द्वयोः सन्दर्भप्रसङ्गानुसारं व्याख्यानं क्रियताम्।** **०८**

(१) *निगमकल्पतरोर्गलितं फलं शुकमुखादमृतद्रवसंयुतम्।*
*पिबत भागवतं रसमालयं मुहुरहोरसिका भुवि भावुकाः ॥*

(२) *इदं भागवतं नाम पुराणं ब्रह्मसम्मितम् ।*
*उत्तमश्लोकचरितं चकार भगवानृषिः ॥*

(३) *देवदत्तामिमां वीणां स्वरब्रह्मविभूषिताम् ।*
*मूर्च्छयित्वा हरिकथां गायमानश्चराम्यहम् ॥*

**प्रश्नः ६ कस्याप्येकस्योत्तरं सविस्तरं लिख्यताम् ।** ०८

(१) *कुन्तीकृताश्रीकृष्णस्तुतिः व्यासेन विविच्यताम् ।*

(२) *श्रीभीष्मकृतभगवत्स्तवनं विस्तरेण वर्णयन्तु ।*

**प्रश्नः ७ अधोलिखितयोः काप्येका टिप्पणी लेख्या ।** ०२

*(१) उत्तरास्तुतिः (२) अर्जुनस्तुतिः*

**प्रश्नः ८ अधोलिखितेषु एकस्य पात्रपरिचयो देयः ।** ०२

*(१) श्रीकृष्णः (२) देवर्षिनारदः (३) व्यासमहर्षिः*

## तृतीयान्वितिः ( युनिट – ३ )

**प्रश्नः ९ अधोलिखितश्लोकेषु द्वयोः सन्दर्भप्रसङ्गान्वयपूर्वकं व्याख्यानं क्रियताम् ।** ०८

(१) *भवद्विधा भागवतास्तीर्थभूताः स्वयं विभो ।*
*तीर्थकुर्वन्ति तीर्थानि स्वान्तस्थेन गदाभृता ॥*

(२) *अहो महीयसी जन्तोर्जीविताशा यया भवान् ।*
*भीमापवर्जितं पिण्डमादत्ते गृहपालवत् ॥*

(३) *गताः सप्ताधुना मासाः भीमसेन तवानुजः ।*
*नायाति कस्य वा हेतोर्नाहं वेदमञ्जसा ॥*

**प्रश्नः १० कस्याप्येकस्योत्तरं सविस्तरं दीयताम् ।** ०८

(१) *ब्राह्मणवर्णितानि परीक्षिल्लक्षणानि वर्णयन्तु ।*

(२) *युधिष्ठिरकृतापशुकनवर्जनं विस्तारेण क्रियताम् ।*

**प्रश्नः ११ अधोलिखितासु टिप्पणीद्वयं लिख्यताम् ।** ०४

*(१) युधिष्ठिरराज्यव्यवस्था ।*

*(२) द्वारकावासिकृतभगवत्स्तवनम् ।*

*(३) अर्जुनगीतभगवदुपकाराः ।*

*(४) धराधर्मसंवादः ।*

**प्रश्नः १२ अधोलिखितप्रश्नेषु पञ्चानां लघुवाक्येनोत्तरं दीयताम् ।** ०५

*(१) प्रथमस्कन्धे कत्यध्यायाः का च लीला ?*

*(२) भगवतोऽवताराः मुख्याः कति ?*

*(३) श्रीकृष्णस्य परमः सखा कः ?*

*(४) परीक्षित्महाराजेन कति स्थानानि कलये दत्तानि ? कानि च तानि ?*

*(५) परीक्षिते केन शापः दत्तः कोऽर्थः ?*

*(६) 'गावल्गणे' इत्यस्य कोऽर्थः ?*

*(७) औत्तरेयः इत्यस्य कोऽर्थः का च व्युत्पत्तिः ?*

=०=